**सोमसुत्** पु० सोमं सुतवान् सु—भूते क्विप् । यज्ञार्थं कृतसोमलतानिष्पीड़ने शि० कौ० ।

**सोमसुता** स्त्री ६त० । नर्मदानद्याम् राजनि० । २बुधे पु० सोमोद्भवादयोऽप्यत्र यथायथम् पुंस्त्री० । [शब्दचि०

**सोमसुत्वन्** पु० सोमं सुतवान् सु—भूते क्वनिप् । कृतसोमर०

**सोमसूत्र** न० सोमस्य जलस्य सूत्रमिव प्रणाली । १जलनिर्गम प्रणाल्याम् शिवलिङ्गस्यगौरीपट्टस्य २जलनिर्गमस्थाने च "सोमसूत्रं न लङ्घयेत्" तन्त्रम् । [रत्नकैरवे रत्नमा० ।

**सोमाख्य** न० सोमं लताभेदमाख्यातिवर्णेन आ+ख्या-क ।

**सोमातिपूत** पु० सोमोऽतिपूतो वान्तो मुखभिन्नच्छिद्रेण येन अति+पू-कर्मणि क्त । कृते सोमरसपाने आधिक्यात् मुखभिन्ननासिकादिच्छिद्रैः सोमरसवमनकर्त्तरि तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यः ।

**सोल्लुण्ठ** त्रि० सह उल्लुण्ठेन सादेशः । भूमौ पार्श्वपरिवर्त्तादियुक्ते १चम्वादौ हला० २स्तुते निन्दापरतया निन्दाया वा स्तुतिपरतया युक्ते ३वाक्ये च ।

**सोल्लुण्ठन** न सह उल्लुण्ठनेन सादेशः । अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनसहिते वाक्ये (स्तुतिपरस्य निन्दापरता निन्दापरस्य च स्तुतिपरता इत्येवं कल्पके वाक्ये)।

**सोष्यन्तीहोम** पु० सोष्यन्तीं सूतापन्नामासन्नप्रसवां ज्ञात्वा कार्य्यः होमः । सोष्यन्त्या आसन्नप्रसवाया हिताय कर्त्तव्ये होमभेदे तत्प्रकारः सं० त० दृश्यः ।

**सौकर्य्य** न० सुकरस्य भावः कर्म वा ष्यञ् । १अनायाससाध्यत्वे जटा० । २सुकरस्य कर्मणि च ।

**सौखसुप्तिक** त्रि० सुखसुप्तिं सुखेन शयनं पृच्छति ठञ् । प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ हेमच० ।

**सौखिक** त्रि० सुखं प्रयोजनमस्य ठक् । सुखाभिलाषिणि (सौखिन) ।

**सौख्य** न० सुखमेव चातु० ष्यञ् । सुखे हेमच० ।

**सौगत** पु० सुगत एव अण् । १सुगते बुद्धभेदे हेमच० तस्येदमण् ।२सुगतसम्बन्धिनि त्रि० । सुगतमत मधीते अण् । ३सुगतमताध्यायिनि त्रि० । [शब्दर० ।

**सौगन्ध** न० सुष्ठु गन्धोऽस्य स्वार्थे अण् । कत्तृणे रामकर्पूरे

**सौगन्धिक** न० सुष्ठु गन्धः सुगन्धः सोऽस्त्यस्य ठन् स्वार्थे अण् । १कह्लारे अमरः ।२सुगन्धके पु० अमरः । सुगन्धेन व्यवहरति ठक् । (गन्धी) ३सुगन्धव्यवहर्त्तरि त्रि० मेदि० । ४पद्मभेदे भा० व० सौगन्धिकाहरणपर्व । [२सुगन्धौ ।

**सौगन्ध्य** न० सुगन्धस्य भावः ष्यञ् । १सद्गन्धे । स्वार्थे ष्यञ् ।

**सौचिक** पु० सूचीं तत्कर्मसीवनमुपजीवति ठन् । (दरजी) सीवनकारके अमरः । इन् । सौचि तथार्थे शब्दर० ।

**सौजन्य** न० सुजनस्य भावः ष्यञ् । १सुजनतायां २सद्व्यवहारे च "सौजन्यजन्यं यशः" मल्लिनाथः ।

**सौण्डी** स्त्री शुण्डा तदाकारोऽस्त्यस्याः अण् ङीप् पृषो० शस्य सः । गजपिप्पल्याम् शब्दच० ।

**सौत्र** पु० पाणिन्यादिभिः सूत्रेण कर्मविशेषाय पठितः अण् । भ्वाद्यादिदशगणीयभिन्नेषु सूत्रमात्रे कार्य्यभेदार्थं पठितेषु १धातुषु । सूत्रं यज्ञसूत्रमर्हति अण् । २विप्रे हेमच० ।

**सौत्रामणी** स्त्री सुत्रामा इन्द्रो देवताऽस्य अण् मपूर्वत्वात् न टिलोपः णत्वम् । इष्टिभेदे तत्र हि सुरापानं विप्राणां विहितम् । "सौत्रामण्यां सुरां पिबेत्" स्मृतिः । स च यज्ञः ऋद्धिकामस्य ब्राह्मणस्यैव कर्त्तव्यः तत्राधिकारिविशेषः कात्या० श्रौ० १९ । १ क० उक्तः । "ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य" सू० । "ब्राह्मणग्रहणं क्षत्रियवैश्ययोर्निवृत्त्यर्थम्" कर्कः । "अग्निचित्सोमयाजिसोमातिपूतसोमवामिनाम्" सू० "एभिश्च निमित्तैः सौत्रामणी भवति । तत्राग्निचित्सोमयाजीति ग्रहणम् अग्निमतः सोमस्याङ्गं यथा स्यादिति स हि फलवान् निष्फलोऽग्निरिति एवं च सत्यग्निमत्सोमयागान्ते सौत्रामणी भवति । ननु चानग्निमतोऽपि सोमस्याङ्गत्वेन सौत्रामणी श्रूयते "सोमेनेष्ट्वा सौत्रामण्या यजेतेति नैतदेवम् अग्निं चित्वा सौत्रामण्या यजेतेत्यस्य वाक्यस्याग्निप्रकरणे श्रुतत्वात् तदङ्गता युक्ता यस्य प्रकरणम् तस्यान्यद्विधीयमानं तदङ्गमेव भवतीति न्यायम् । सोमेनेष्ट्वा सौत्रामण्या यजेतेति सौत्रामणीप्रकरणे पाठः तेन प्रस्तुतविपरिवृत्त्या सोमस्यैव सौत्रामण्यङ्गता भवति न सौत्रामण्याः सोमाङ्गता यथा "वाजपेयेनेष्ट्वा वृहस्पतिसवेन यजेतेति" वाजपेयं प्रकृत्य विधानात् वाजपेयाङ्गता वृहस्पतिसवस्य, तस्मान्नानग्निमति सोमे सौत्रामणी "सोमेनेष्ट्वा सौत्रामण्या यजेतेति किमर्थस्तर्हि पाठः अग्निमत् सोमस्यानुवादोऽयमित्यदोषः । यद्वाऽग्निं चित्वेत्यस्यैव शेषोऽयम् अग्निमता सोमेनेष्ट्वेति तदुक्तं भवति । सोमातिपूतसोमवामिनोश्च सौत्रामणी भवति शाखान्तरस्मरणात् सोमातिपूतः सोमवामी च ब्राह्मण एव न हि क्षत्रियवैश्ययोरेतद्विशेषणमिति ननु च सोमकार्य्ये तयोरपि न्यग्रोधविधानम् तेन तदतिपवने तद्वमने च किमिति न भवति नैतदेवं यदि नाम कार्य्यापत्त्या धर्म्मप्राप्तिर्भवति न